श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीता

# ॥ श्री भूस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भूस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सङ्कल्पकल्पलतिकामवधिं क्षमायाः
    स्वेच्छावराहमहिषीं सुलभानुकम्पाम्।
विश्वस्य मातरमकिञ्चनकामधेनुं
    विश्वम्भरामशरणः शरणं प्रपद्ये ॥ **1** ॥

त्वां व्याहृतिः प्रथमतः प्रणवः प्रियं ते
    संवेदयत्यखिलमन्त्रगणस्तमेव।
इत्थं प्रतीतविभवामितरेष्विदानीं
    स्तोतुं यथावदवने क इवार्हति त्वाम् ॥ **2** ॥

नित्यं हिताहितविपर्ययबद्धभावे
    त्वद्वीक्षणैकविनिवर्त्यबहुव्यपाये।
मुग्धाक्षरैरखिलधारिणि मोदमाना
    मातः स्तनन्धयधियं मयि वर्तयेथाः ॥ **3** ॥

सङ्कल्पकिङ्करचराचरचक्रवाळं
    सर्वातिशायिनमनन्तशयस्य पुंसः।
भूमानमात्मविभवैः पुनरुक्तयन्ती
    वाचामभूमिरपि भूमिरसि त्वमेका ॥ **4** ॥

वेधस्तृणावधि विहारपरिच्छदं ते
विश्वं चराचरतया व्यतिभिद्यमानम्।
अम्ब त्वदाश्रिततया परिपोषयन्ती
विश्वम्भरस्य दयिताऽसि तदेकनामा ॥ 5 ॥

सर्वंसहेत्यवनिरित्यचलेति मातः
विश्वम्भरेति विपुलेति वसुन्धरेति।
अन्यानि चान्यविमुखान्यभिधानवृत्त्या
नामान्यमूनि कथयन्ति तवानुभावम् ॥ 6 ॥

तापान् क्षिपन् प्रसविता सुमनोगणानां
प्रच्छायशीतळतलः प्रदिशन् फलानि।
त्वत्सङ्गमाद्भवति माधवि लब्धपोषः
शाखाशतैरधिगतो हरिचन्दनोऽसौ ॥ 7 ॥

स्मेरेण वर्धितरसस्य मुखेन्दुना ते
निस्पन्दतां विजहतो निजया प्रकृत्या।
विश्रान्तिभूमिरसि तत्त्वतरङ्ग पङ्क्तेः
वेलेव विष्णुजलधेरपृथग्भवन्ती ॥ 8 ॥

स्वाभाविके वसुमति श्रुतिभिर्विभाव्ये
पत्युर्महिम्नि भवतीं प्रतिपन्नवासाम्।
शङ्के विमानवहनप्रतिमासमानाः
स्तम्बेरमप्रभृतयोऽपि वहन्ति सत्त्वाः ॥ 9 ॥

सम्भावयन् मधुरिपुः प्रणयानुरोधात्
वक्षःस्थलेन वरुणालयराजकन्याम्।
विश्वम्भरे बहुमुखप्रतिपन्नभोगः
शेषात्मना तु भवतीं शिरसा दधाति ॥ 10 ॥

क्रीडावराहदयिते कृतिनः क्षितीन्द्राः
सङ्क्रन्दनस्तदितरेऽपि दिशामधीशाः।
आमोदयन्ति भुवनान्यळिकाश्रितानाम्
अम्ब त्वदङ्घ्रिरजसां परिणामभेदैः ॥ **11** ॥

भूतेषु यत् त्वदभिमानविशेषपात्रं
पोषं तदेव भजतीति विभावयन्तः।
भूतं प्रभूतगुणपञ्चकमाद्यमेतत्
प्रायो निदर्शनतया प्रतिपादयन्ति ॥ **12** ॥

कान्तस्तवैष करुणाजलधिः प्रजानाम्
आज्ञातिलङ्घनवशादुपजातरोषः।
अह्नाय विश्वजननि क्षमया भवत्या
सर्वावगाहनसहामुपयात्यवस्थाम् ॥ **13** ॥

आश्वासनाय जगतां पुरुषे परस्मिन्
आपन्नरक्षणदशामभिनेतुकामे।
अन्तर्हितेतरगुणादबलास्वभावात्
औदन्वते पयसि मज्जनमभ्यनैषीः ॥ **14** ॥

पूर्वं वराहवपुषा पुरुषोत्तमेन
प्रीतेन भोगिसदने समुदीक्षितायाः।
पादाहताः प्रळयवारिधयस्तवासन्
उद्वाहमङ्गळविधेरुचिता मृदङ्गाः ॥ **15** ॥

व्योमातिलङ्घिनि विभोः प्रळयाम्बुराशौ
वेशन्तलेश इव मातुमशक्यमूर्तेः।
सद्यः समुद्रवसने सरसैरकार्षीः
आनन्दसागरमपारमपाङ्गपातैः ॥ **16** ॥

दंष्ट्राविदारितमहासुरशोणिताङ्कैः
अङ्गैः प्रियस्तव दधे परिरम्भलीलाम्।
सा ते पयोधिजलकेळिसमुत्थितायाः
सैरन्ध्रिकेव विदधे नवमङ्गरागम्॥ **17** ॥

अन्योन्यसंवलनजृम्भिततूर्यघोषैः
संवर्तसिन्धुसलिलैर्विहिताभिषेका।
एकातपत्रयसि विश्वमिदं गुणैः स्वैः
अध्यास्य भर्तुरधिकोन्नतमंसपीठम्॥ **18** ॥

भर्तुस्तमालरुचिरे भुजमध्यभागे
पर्यायमौक्तिकवती पृषतैः पयोधेः।
तापानुबन्धशमनी जगतां त्रयाणां
तारापथे स्फुरसि तारकिता निशेव॥ **19** ॥

आसक्तवासवशरासनपल्लवैस्त्वां
संवृद्धये शुभतटिद्गुणजालरम्यैः।
देवेशदिव्यमहिषीं धृतसिन्धुतोयैः
जीमूतरत्नकलशैरभिषिञ्चति द्यौः॥ **20** ॥

आविर्मदैरमरदन्तिभिरुह्यमानां
रत्नाकरेण रुचिरां रशनागुणेन।
मातस्त्रिलोकजननीं वनमालिनीं त्वां
मायावराहमहिषीमवयन्ति सन्तः॥ **21** ॥

निष्कण्टकप्रशमयोगनिषेवणीयां
छायाविशेषपरिभूतसमस्ततापाम्।
स्वर्गापवर्गसरणिं भवतीमुशन्ति
स्वच्छन्दसूकरवधूमवधूतपङ्काम्॥ **22** ॥

गण्डोज्ज्वलां गहनकुन्तळदर्शनीयां
शैलस्तनीं तरळनिर्झरलम्बहाराम्।
श्यामां स्वतस्त्रियुगसूकरगेहिनि त्वं
व्यक्तिं समुद्रवसनामुभयीं बिभर्षि॥ **23**॥

निःसंशयैर्निगमसीमनि विष्णुपत्नि
प्रख्यापितं भृगुमुखैर्मुनिभिः प्रतीतैः।
पश्यन्त्यनन्यपरधीरससंस्कृतेन
सन्तः समाधिनयनेन तवानुभावम्॥ **24**॥

सञ्चोदिता करुणया चतुरः पुमर्थान्
व्यातन्वती विविधमन्त्रगणोपगीता।
सञ्चिन्त्यसे वसुमति स्थिरभक्तिबन्धैः
अन्तर्बहिश्च बहुधा प्रणिधानदक्षैः॥ **25**॥

क्रीडागृहीतकमलादिविशेषचिह्नां
विश्राणिताभयकरां वसुधे सभूतिम्।
दौर्गत्यदुर्विषविनाशसुधानदीं त्वां
सञ्चिन्तयन् हि लभते धनदाधिकारम्॥ **26**॥

उद्वेलकल्मषपरम्परितादमर्षात्
उत्तंसितेन हरिमञ्जलिनाऽप्यधृष्यम्।
आकस्मिकोऽयमधिगम्ययति प्रजानाम्
अम्ब त्वदीयकरुणापरिणाम एव॥ **27**॥

प्रत्येकमब्दनियुतैरपि दुर्व्यपोहात्
प्राप्ते विपाकसमये जनितानुतापात्।
नित्यापराधनिवहाच्चकितस्य जन्तोः
गन्तुं मुकुन्दचरणौ शरणं क्षमे त्वम्॥ **28**॥

त्राणाभिसन्धिसुभगेऽपि सदा मुकुन्दे
संसारतन्त्रवहनेन विळम्बमाने।
रक्षाविधौ तनुभृतामनघानुकम्पा
मातः स्वयं वितनुषे महतीमपेक्षाम्॥ 29॥

धर्मद्रुहं सकलदुष्कृतिसार्वभौमम्
आत्मानभिज्ञमनुतापलवोज्झितं माम्।
वैतानसूकरपतेश्चरणारविन्दे
सर्वंसहे ननु समर्पयितुं क्षमा त्वम्॥ 30॥

तापत्रयीं निरवधिं भवतीदयार्द्राः
संसारघर्मजनितां सपदि क्षिपन्तः।
मातर्भजन्तु मधुरामृतवर्षमैत्रीं
मायावराहदयिते मयि ते कटाक्षाः॥ 31॥

पत्युर्दक्षिणपाणिपङ्कजपुटे विन्यस्तपादाम्बुजा
वामं पन्नगसार्वभौमसदृशं पर्यङ्कयन्ती भुजम्।
पोत्रस्पर्शलसत्कपोलफलका फुल्लारविन्देक्षणा
सा मे पुष्यतु मङ्गळान्यनुदिनं सर्वाणि सर्वंसहा॥ 32॥

अस्येशाना जगत इति या श्रूयते विष्णुपत्नी
तस्याः स्तोत्रं विरचितमिदं वेङ्कटेशेन भक्त्या।
श्रद्धाभक्तिप्रचयगुरुणा चेतसा संस्तुवानः
यद्यत् काम्यं सपदि लभते तत्र तत्र प्रतिष्ठाम्॥ 33॥

॥ इति श्री भूस्तुतिः समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥